हि यस्मात्तल्लाभे अस्थ्नामप्राप्तौ पलाशमय तत्तनपुत्तलकस्य दाहक्रिया । पुनरपि सम्भवे अस्थिलाभे पुनरपि अस्थिदाहक्रिया विहिता तस्माद्यदि पुनरस्थीनि प्राप्यन्ते तदा पुनर्दाहत्रिरात्राशौचे कर्त्तव्ये न पुनः पित्रादिदानं वक्ष्यमाणयुक्तेः । विष्णुः ।

"विपन्ने तु मृते पर्णनरं दद्यादनग्निकः ।
त्रिपक्षाभ्यन्तरे राजन्नेव पर्णनरं दहेत् ॥
तदूर्द्धमष्टमीं प्राप्य दर्शं वापि विचक्षणः ॥"

दहेदिति शेषः । अस्यार्थः । अशौचाभ्यन्तरे यदि पर्णनरदाहं न कुर्य्यात्तदा मरणदिनावधित्रिपक्षानन्तरं दाहः कार्य्य इत्यर्थः । इति हरिदासतर्काचार्य्याः ॥ यादवभट्टोऽप्येवम् । व्यवहारोऽपि ईदृश एव ।

'पर्णनरं दहेन्नैव विना दर्शं कदाचन ।
अस्थ्नामलाभे दर्शे तु ततः पर्णनरं दहेदिति ॥'

दीपकलिकायां सुमन्तुवचनात् दर्शे पर्णनरदाहः । दर्शमित्यष्टमीमिति क्वचित् पाठः । अत्राष्टमी कृष्णा पितृकर्म्मणि कृष्णपक्षस्य प्रशस्तोक्तेः ।" इति शुद्धितत्त्वम् ॥

पर्णभेदिनी, स्त्री, (पर्णानि भिनत्तीति । पर्ण + भिद् + णिनिः स्त्रियां ङीप् ।) प्रियङ्गुः । इति राजनिर्घण्टः ॥

पर्णभोजनः, पुं, (पर्णान्येव भोजनं यस्य । पर्णानि भुङ्क्ते इति वा । भुज् + कर्त्तरि ल्युः ।) छागलः । इति शब्दरत्नावली ॥

पर्णमाचालः, पुं, (पर्णमाचालयतीति । पर्ण + आ + चल + णिच् + अण् । निपातनात् विभक्तिलोपाभावः । बाहुलकात् मुम् वा ।) कर्म्मरङ्गवृक्षः । इति शब्दमाला ॥

पर्णमृगः, पुं, (पर्णचरो मृगः पशुः ।) मृगगणविशेषः । यथा,—

"वनौकोवृक्षमार्ज्जारवृक्षमर्कटिकादयः ।
एते पर्णमृगाः प्रोक्ताः सुश्रुताद्यैर्महर्षिभिः ॥
वनौका वानरो वृक्षमार्ज्जारो वृक्षविड़ालः ।
वृक्षमर्कटिका चखी इति लोके । एतेषां मांसगुणाः । [हिताः ।
"स्मृताः पर्णमृगा वृष्याश्चक्षुष्याः शोषिणे
श्वासार्शःकासशमनाः सृष्टमूत्रपुरीषकाः ॥"
इति भावप्रकाशः ॥

पर्णलता, स्त्री, (पर्णप्रधाना लता ।) नागवल्ली । इति राजनिर्घण्टः ॥

पर्णवल्ली, स्त्री, (पर्णप्रधाना वल्ली ।) पलाशी लता । इति राजनिर्घण्टः ॥

पर्णशाला, स्त्री, (पर्णैः पत्रादिभिः रचिता शाला । मध्यपदलोपिसमासः ।) मुनीनां पत्ररचितगृहम् । तत्पर्य्यायः । उटजम् २ । इत्यमरः । २ । २ । ६ ॥ पर्णोटजम् ३ । इति शब्दरत्नावली ॥ पर्णवती शाला । पर्णप्रधाना शाला वा । इति भरतः ॥ (यथा, रघुः । १ । ९५ ।

"निर्द्दिष्टां कुलपतिना स पर्णशाला-
मध्यास्य प्रयतपरिग्रहद्वितीयः ।
तच्छिष्याध्ययननिवेदितावसानां
संविष्टः कुशशयने निशां निनाय ॥"

मध्यदेशस्थग्रामविशेषः । यथा महाभारते । १२ । १८ । ३ ।

"मध्यदेशे महान् ग्रामो ब्राह्मणानां बभूव ह ।
गङ्गायमुनयोर्मध्ये यामुनस्य गिरेरधः ॥
पर्णशालेति विख्यातो रमणीयो नराधिप ! ॥")

पर्णसिः, पुं, (पॄ पूर्त्तौ + "सानसिवर्णसिपर्णसि ।" ऊणा । ४ । १०७ । इति असिनुक् च ।) पद्मम् । इत्युणादिकोषः ॥ जलगृहम् । जलटुङ्गी इति भाषा ॥ इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ शाकम् । आभरणक्रिया । इति संक्षिप्तसारोणादिवृत्तिः ॥

पर्णाशनः, पुं, (पर्णं अश्नाति भक्षयतीति । अश + ल्युः । पर्णानामशनः ।) मेघः । इति शब्दमाला ॥

पर्णासः, पुं, (पर्णैरसति दीप्यति शोभते इति यावत् । अस दीप्तौ + अच् ।) तुलसी । इत्यमरः । २ । ४ । ७९ ॥

पर्णिनी, स्त्री, (पर्णानि सन्त्यस्याः । पर्ण + इनिः ।) माषपर्णी । इति रत्नमाला ॥ (यथा, सुश्रुते उत्तरतन्त्रे ६२ अध्याये ।

"वर्हिष्ठरजनीकुष्ठ पर्णिनीशारिवाह्वयैः ॥"

अप्सरोविशेषः । यथा, हरिवंशे । २१८ । ४९ ।

"मेनकासहजन्या च पर्णिनी पुञ्जिकास्थला ॥")

पर्णी, [न्] पुं, (पर्णानि सन्त्यस्य । पर्ण + इनिः ।) वृक्षः । इति हेमचन्द्रः । ४ । १८० ॥

पर्णोटजं, क्ली, (पर्णनिर्म्मितं उटजम् ।) पर्णशाला । इति शब्दरत्नावली ॥

पर्द्द, ङ अपानोत्सर्गे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-अकं-सेट् ।) ङ, पर्द्दते वृद्धः । इति दुर्गादासः ॥

पर्द्दः, पुं, (पॄ + बाहुलकात् दः ।) केशसमूहः । इत्युणादिकोषः ॥ (पर्द्द अपानोत्सर्गे + अच् ।) अपानोत्सर्गश्च ॥

पर्द्दनं, क्ली, (पर्द्द + ल्युट् ।) अपानोत्सर्गः । इति हेमचन्द्रः । ६ । ३९ ॥ पाद् इति भाषा ॥

पर्प्पं, क्ली, (पॄ पालनादौ + "खष्पशिल्पशष्पवाष्परूपपर्पतल्पाः ।" ऊणा । ३ । २८ । इति निपातनात् सिद्धम् ।) नवतृणम् । गृहम् । इत्युणादिकोषः ॥ खञ्जवाह्यशकटम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

पर्प्पटः, पुं, (पर्प्प + अटन् ।) वृक्षविशेषः । क्षेतपापड़ा इति वङ्गभाषा । दवनपापर इति हिन्दीभाषा । तत्पर्य्यायः । त्रियष्टिः २ तिक्तः ३ । इति रत्नमाला ॥ चरकः ४ रेणुः ५ तृष्णारिः ६ वरकः ७ अरकः ८ शीतः ९ शीतप्रियः १० पांशुः ११ कल्पाङ्गः १२ कर्म्मकण्टकः १३ कृशशाखः १४ प्रगन्धः १५ सुतिक्तः १६ रक्तपुष्पकः १७ पित्तारिः १८ कटुपत्रः १९ पत्रः २० । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । पित्तश्लेष्मज्वररक्तदाहारुचिग्लानिमदभ्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥

"पर्प्पटो वरतिक्तश्च स्मृतः पर्प्पटकश्च सः ।
कथितः पांशुपर्य्यायस्तथा कवचनामकः ॥
पर्प्पटो हन्ति पित्तास्रभ्रमतृष्णाकफज्वरान् ।
संग्राही शीतलस्तिक्तो दाहनुद्वातलो लघुः ॥"
इति भावप्रकाशः ॥ * ॥

पिष्टकभेदः । पापर इति भाषा ॥ तस्य गुणाः । लघुत्वम् । रूक्षत्वञ्च । इति राजवल्लभः ॥

"धूमसीरचिता हिङ्गुहरिद्रालवणैर्युताः ।
जीरकस्वर्जिकाभ्याञ्च तनु कृत्वा च वेल्लिताः ॥
दीपनाः पाचना रूक्षा गुरवः किञ्चिदीरिताः ॥
मौद्गाश्च तद्गुणाः प्रोक्ता विशेषाल्लघवो हिताः ।
चणकस्य गुणैर्युक्ताः पर्प्पटाश्चणकोद्भवाः ॥
माषे भष्टास्तु ते सर्व्वे भवेयुर्मध्यमा गुणैः ॥"
इति भावप्रकाशे पूर्व्वखण्डे द्वितीयभागे ॥

पर्प्पटद्रुमः, पुं, (पर्प्पट एव द्रुमः ।) कुम्भीवृक्षः इति राजनिर्घण्टः ॥

पर्प्पटी, स्त्री, (पर्प्पट + ङीप् ।) सौराष्ट्रमृत्तिका । इति रत्नमाला ॥ पिष्टकभेदः । इत्युणादिकोषः ॥ उत्तरदेशभवसुगन्धिद्रव्यम् । पपरीति प्रसिद्धम् । पद्मावतीति च । तत्पर्य्यायः । रञ्जनी २ कृष्णा ३ जतुका ४ जननी ५ जनी ६ जतुकृष्णा ७ संस्पर्शा ८ जतुकृत् ९ चक्रवर्त्तिनी १० । अस्या गुणाः । तुवरत्वम् । तिक्तत्वम् । शिशिरत्वम् । वर्ण्यत्वम् । लघुत्वम् । विषव्रणकण्डूकफपित्तास्रकुष्ठनाशित्वञ्च । इति भावप्रकाशः ॥

पर्प्परीकः, पुं, (पिपर्त्तीति । पॄ + "शॄपॄभ्यां ईकक् चाभ्यासस्य ।" ऊणा । ४ । १९ । इति ईकन् द्वित्वं अभ्यासस्य रुगागमश्च ।) सूर्य्यः । इत्युणादिकोषः ॥ वह्निः । इति त्रिकाण्डशेषः । जलाशयः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पर्प्पिकः, पुं स्त्री, पर्प्पेण गच्छतीति । (पर्प्प + ष्ठन् ।) खञ्जः । इति सिद्धान्तकौमुदी ॥

पर्ब्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां परं-सकं-सेट् ।)

पर्य्यङ्कः, पुं, (परितोऽच्यते इति । परि + अकि लक्षणे + घञ् ।) खट्वा । पालङ्क इति भाषा ॥ इत्यमरः । २ । ६ । १३८ ॥ तत्पर्य्यायः । (मञ्चः मञ्चकः ३ पल्यङ्कः ४ । इति हेमचन्द्रः । ३ । ३४७ ॥) पर्य्यङ्किका ५ परिकरः ६ अवसक्थिका ७) इति च तत्रैव । ३ । ३४३ ॥ (यथा, महाभारते । ३ । २४६ । ८ ।

"अथोपविष्टं राजानं पर्य्यङ्के ज्वलनप्रभे ।
उपप्लुतं यथा सोमं राहुणा रात्रिसंक्षये ।
उपगम्याब्रवीत् कर्णो दुर्य्योधनमिदं तदा ॥"

योगपट्टः । यथा, कुमारे । ३ । ४५ ।

"पर्य्यङ्कबन्धस्थिरपूर्व्वकाय-
मृज्वायतं सन्नमितोभयांसम् ॥")

पर्य्यङ्कपादिका, स्त्री, (पर्य्यङ्कस्येव पादोऽस्त्यस्याः । ठन् टाप् च ।) कोलशिम्बी । इति राजनिर्घण्टः ॥

पर्य्यङ्कबन्धनं, क्ली, (पर्य्यङ्कवत् यद्बन्धनम् ।) वस्त्रादिना पृष्ठजानुजङ्घाबन्धनम् । फाङ्बांधा इति भाषा ॥ यथा,—